स्तानाम्, आद्येऽपि न तावद्युगपत् सर्वेषाम्भोक्तृता। तदा स्वार्थप्रवृत्तानां तेषाम् अन्योऽन्यमङ्गाङ्गिभावानुपपत्तौ संघातापत्त्यभावप्रसङ्गात्। अन्तरेणैव संघातम्भोक्तृत्वे देहाद्बहिरप्येकैकस्य भूतस्य भोक्तृतोपलभ्येत। नापि क्रमेण तेषां भोक्तृत्वं संघातानुपपत्तितादवस्थ्यात्। न च वरविवाहन्यायेन गुणप्रधानभावेन तदुपपत्तिः; वैषम्यात्। यथैकैकवरस्यासाधारणत्वेनैकैका कन्या भोग्या न तथा चतुर्णां पृथिव्यप्तेजोवायूनां भोक्तॄणां रूपरसगन्धस्पर्शा भोग्या व्यवस्थिताः। कथं क्रमभोगः। अथ कथञ्चित् व्यवतिष्ठेरन्। तदा युगपत्सर्वविषयसन्निधाने सति क्रमानुपपत्तिः। यथैकस्मिन् मुहूर्त्ते प्रत्येकं भोग्यकन्यावस्तुनि सन्निहिते वराणां क्रमविवाहोगुणप्रधानतया संघातोवा नास्ति तद्वत्। नापि समस्तानां भोक्तृत्वसम्भवः। प्रत्येकमविद्यमानस्य चैतन्यस्य संघातेऽप्यभावाद्भोगानुपपत्तेः। अथ मन्यसेऽग्नौ प्रक्षिप्तेषु तिलेष्वेकैकस्य ज्वालाजनकत्वाभावेऽपि तिलसमूहस्य यथा तज्जनकत्वं तथा संघातस्यैव चैतन्यं स्यादिति तदपि संघातापत्तौ हेतुर्वक्तव्यः। आगामिभोगो हेतुरिति चेन्न यदि तावद्भोगस्य गुणभावः तदा प्रधानभूतानामन्योऽन्यं गुणप्रधानभावरहितानां कथं संघातापत्तिः प्राधान्यं तु भोगस्यानुपपन्नम् भोक्तृशेषत्वात्। नच वाच्यं शेषिणं भोगं प्रति शेषभूतयोः स्त्रीपुंशरीरयोः भोक्त्रोः संघातापत्तिर्दृष्टेति, तत्रापि शरीरे भोक्तृत्वासंप्रतिपत्तेः। ज्वालां प्रति तिलानां संघातापत्तिरिति योऽयं दृष्टान्तः सोऽपि तवासिद्धः संघातानिरूपणात्। न तावत् संघातोनाम भोग्यभोगिनोर्वनवदेकदेशतामात्रम् तथा सति तेन न्यायेन व्यापिनां भूतानां सर्वत्र सत्त्वाच्चैतन्यभोगयोः सार्वत्रिकत्वप्रसङ्गात्। नापि तदारब्धोऽवयवी संघातः तस्य भूतेभ्योभेदे पञ्चमतत्त्वाभ्युपगमप्रसङ्गात्। अभेदे भूतमात्रतया संघातत्वासम्भवात्। भेदाभेदयोश्चानङ्गीकरणात्। अथावयविनः पारतन्त्र्यान्न पञ्चमतत्त्वापत्तिस्तर्हि जलादेः पृथिव्यादितन्त्रत्वान्न तत्त्वचतुष्टयमपि सिध्येत्। न चैकद्रव्यबुद्धावन्वयोग्यतापत्तिः संघातः, वस्तुतोऽनेकेष्वेकत्वबुद्धेर्विभ्रममात्रत्वात्। न चैकार्थक्रियायां युगपदन्वयः संघातः, तदानीं काष्ठाश्रयेण वह्निना वायुसमुद्धूते जले ताप्यमाने सति तत्र भूतचतुष्टयसंघाताद्भोगप्रसङ्गात्। नचान्योन्यमयःपिण्डवत्संश्लेषः संघातः, शरीरे वायोस्तथा श्लेषाभावात्। वह्निव्याप्तेनायःपिण्डेन सन्तापितजले वायुसंयुक्ते भोगप्रसङ्गात्। न चोक्तदोषपरिहारायैकस्यैव भूतस्य भोक्तृत्वनियतिः शङ्कनीया सर्वसन्निधानात् कस्य भोक्तृत्वमित्यनिर्द्धारणात्। यत्तु लोकायतैकदेशिनां मतद्वयम् इन्द्रियाणां भोक्तृत्वम्। शरीरेन्द्रियसङ्घातस्य च भोक्तृत्वमिति। तदुक्तन्यायेन निराकरणीयम्। ननु कानि पुनरिन्द्रियाणि येषां भोक्तृत्वं निराक्रियते। तत्र गोलकमात्राणीति सुगताः। तच्छक्तय इति मीमांसकाः। तद्व्यतिरिक्तानि द्रव्यान्तराणीत्यन्ये सर्ववादिनः। तत्र न तावत् गोलकमात्रत्वं युक्तं कर्णशष्कुल्यादिविरहिणामपि सर्पादीनां शब्दाद्युपलब्धिसद्भावात् वृक्षाणां सर्वगोलकरहितानां विषयोपलम्भसत्त्वाच्च "तस्मात्पश्यन्ति पादपा" इत्यादि शास्त्रात्। न च वृक्षाणामचेतनत्वं हिंसाप्रतिषेधेन प्राणित्वावगमात् एवं गोलकशक्तित्वमिन्द्रियाणाम् न। अथ मन्यसे शक्तिमद्द्रव्यान्तरकल्पनात् प्रतिपन्नस्थानेषु शक्तिमात्रकल्पने लाघवमिति। तर्ह्यत्यन्तलाघवादात्मन एव क्रमकारिसर्वविज्ञानसामर्थ्यं कल्प्यतां किमेभिरिन्द्रियैः। न च सर्वगतस्यात्मनो गोलकप्रदेशेष्वेव ज्ञानपरिणामोऽनुपपन्नः, त्वया तस्यैव शरीरप्रदेशमात्रे ज्ञानपरिणामाङ्गीकारात्। एवं चानिन्द्रियेष्वपि गोलकप्रदेशेषु ज्ञानान्वयव्यतिरेकौ शरीरएवान्यथासिद्धौ। अतो मीमांसकमतमनुपपन्नम्। सन्तु तर्हि द्रव्यान्तराणीन्द्रियाणि तानि गोलके विशेषसंबन्धाच्चक्षुरादिशब्दवाच्यानीति। तदप्ययुक्तम्। तेषु प्रमाणाभावात्। विमताः रूपाद्युपलब्धयः करणपूर्विकाः कर्त्तृव्यापारत्वाच्छिदिक्रियावदिति चेत् करणप्रेरणलक्षणे कर्त्तृव्यापारे करणान्तराभावात् अन्यथाऽनवस्थानात्। "एतस्माज्जायते प्राणोमनः सर्वेन्द्रियाणि" चेत्यागमगम्यानीन्द्रियाणीति चेन्न आगमसंस्काररहिताणामपीन्द्रियप्रतिपत्तेः। न च मनोवत्साक्षिवेद्यानीन्द्रियाणि, रूपादिज्ञानाख्यं लिङ्गमनपेक्ष्य साक्षिमात्रेण चक्षुरादीनां प्रतिपत्तेरभावात्। तस्मान्न सन्त्येवेन्द्रियाणीति। अत्रोच्यते। गोलकव्यतिरिक्तानीन्द्रियाणि आगमादेवावगम्यन्ते। न हि तत्संस्काररहितास्तानि जानन्ति किन्तु गोलकान्येव। यत्तु तेषामिन्द्रियाणामहङ्कारकार्य्यत्वं साङ्ख्यैरुच्यते। तत्र किमध्यात्माहङ्कारः कारणं किं वा कृत्स्नकार्य्यव्यापिनी काचिदहङ्काराख्या प्रकृतिः, उभयत्रापि नास्ति किमपि मानम्। अथ द्वितीयपक्षे नानापुराणवचनानि मानन्तन्न श्रुतिविरोधात्। "अन्नमयं हि सौम्य मन आपोमयः प्राणस्तेजोमयी वागित्यादि" श्रुतौ